# भज गोविन्दम् - मोहमुद्गरः

# Bhaja Govindam – Mohamudgara



You can access and download the detailed notes available at **https://nivedita2015.wordpress.com/bhaja-govindam-moha-mudgara/**

Thanks to my friend, **Smt. Harini Agaram** for the rendition. Watch out for the online classes in Sanskrit to be conducted by **Smt. Vidhya Ramesh** on Bhaja Govindam.

# भज गोविन्दम् - मोहमुद्गरः - 1

## श्लोकः

**भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते ।**

**सम्प्राप्ते सन्निहिते काले नहि नहि रक्षति डुकृञ्करणे ॥१॥**

## पदच्छेदः

भज, गोविन्दम्, भज, गोविन्दम्, गोविन्दम्, भज, मूढमते,

सम्प्राप्ते, सन्निहिते, काले, न, हि, न, हि, रक्षति, डुकृञ्करणे

## अन्वयः

मूढमते । (त्वं) गोविन्दं भज । (त्वं) गोविन्दं भज । (त्वं) गोविन्दं भज । सन्निहिते काले सम्प्राप्ते (सति) “डुकृञ्करणे” न हि रक्षति । न हि (रक्षति) ।

## आकाङ्क्षा

- (हे) मूढमते
- (त्वं) भज
  - कं भज ? गोविन्दम्
- न हि रक्षति
  - किं न रक्षति ? “डुकृञ् करणे”
  - कदा न रक्षति ? सम्प्राप्ते (सति)
    - कस्मिन् सम्प्राप्ते (सति) ? काले
      - कीदृशे काले ? सन्निहिते

## श्लोकः

**मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।**

**यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥२॥**

## पदच्छेदः

मूढ, जहीहि, धनागमतृष्णाम्, कुरु, सद्बुद्धिम्, मनसि, वितृष्णाम्,
यत्, लभसे, निजकर्मोपात्तम्, वित्तम्, तेन, विनोदय, चित्तम्

## अन्वयः

(हे) मूढ । (त्वं) धनागमतृष्णां जहीहि । (त्वं) वितृष्णां सद्बुद्धिं मनसि कुरु । निजकर्मोपात्तं यत् वित्तं (त्वं) लभसे, तेन (त्वं) चित्तं विनोदय ।

## आकाङ्क्षा




- (हे) मूढ
- (त्वं) जहीहि
  - किं जहीहि ? धनागमतृष्णाम्
- (त्वं) कुरु
  - कां कुरु ? सद्बुद्धिम्
    - कीदृशीं सद्बुद्धिम् ? वितृष्णाम्
  - कुत्र कुरु ? मनसि
- (त्वं) विनोदय
  - किं विनोदय ? चित्तम्
  - केन विनोदय ? यत् लभसे तेन
    - किं लभसे ? वित्तम्
      - कीदृशं वित्तम् ? निजकर्मोपात्तम्

# भज गोविन्दम् - मोहमुद्गरः - 3

## श्लोकः

**नारीस्तनभरनाभीदेशं दृष्ट्वा मा गा मोहावेशम् ।**

**एतन्मांसवसादिविकारं मनसि विचिन्तय वारं वारम् ॥३॥**

## पदच्छेदः

नारीस्तनभरनाभीदेशम्, दृष्ट्वा, मा, अगाः, मोहावेशम्, एतत्, मांसवसादिविकारम्, मनसि, विचिन्तय, वारम्, वारम्

## अन्वयः

नारीस्तनभरनाभीदेशं दृष्ट्वा, (त्वं) मोहावेशं मा अगाः ।

एतत् मांसवसादिविकारम् (इति) मनसि वारं वारं (त्वं) विचिन्तय ।

## आकाङ्क्षा

- (त्वं) मा अगाः
    - किं मा अगाः ? मोहावेशम्
    - किं कृत्वा मा अगाः ? दृष्ट्वा
        - कं दृष्ट्वा ? नारीस्तनभरनाभीदेशम्
- (त्वं) विचिन्तय
    - किमिति विचिन्तय ? मांसवसादिविकारम् (इति)
        - कं मांसवसादिविकारम् ? एतत्
    - कुत्र विचिन्तय ? मनसि
    - कथं विचिन्तय ? वारं वारम्

## श्लोकः

**नलिनीदलगतजलमतितरलं तद्वज्जीवितमतिशयचपलम् ।**

**विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम् ॥४॥**

## पदच्छेदः

नलिनीदलगतजलम्, अतितरलम्, तद्वत्, जीवितम्, अतिशयचपलम्, विद्धि, व्याध्यभिमानग्रस्तम्, लोकम्, शोकहतम्, च, समस्तम्

## अन्वयः

नलिनीदलगतजलम् अतितरलं (भवति) । तद्वत् जीवितम् अतिशयचपलं (भवति) । समस्तं लोकं व्याध्यभिमानग्रस्तं शोकहतं च (इति) विद्धि ।

## आकाङ्क्षा

- अतितरलं (भवति)
  - किम् अतितरलं (भवति) ? नलिनीदलगतजलम्
- अतिशयचपलम् (भवति)
  - कथम् अतिशयचपलम् (भवति) ? तद्वत्
  - किम् अतिशयचपलम् (भवति) ? जीवितम्
- (त्वं) विद्धि
  - किं विद्धि ? लोकम्
    - कीदृशं लोकम् ? समस्तम्
  - कीदृशमिति विद्धि ? व्याध्यभिमानग्रस्तम् (इति)
  - पुनः कीदृशमिति विद्धि ? शोकहतं च (इति)

## श्लोकः

**यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ।**

**पश्चाज्जीवति जर्जरदेहे वार्तां कोऽपि न पृच्छति गेहे ॥५॥**

## पदच्छेदः

यावत्, वित्तोपार्जनसक्तः, तावत्, निजपरिवारः, रक्तः, पश्चात्, जीवति, जर्जरदेहे, वार्ताम्, कः, अपि, न, पृच्छति, गेहे

## अन्वयः

(कश्चित्पुरुषः) यावत् वित्तोपार्जनसक्तः (भवति), तावत् निजपरिवारः (तस्मिन्) रक्तः (भवति) । पश्चात् जर्जरदेहे जीवति (सति) गेहे कः अपि वार्तां न पृच्छति ।

## आकाङ्क्षा

- रक्तः (भवति)
    - कः रक्तः (भवति) ? निजपरिवारः
    - यावत् रक्तः (भवति) ? यावत् वित्तोपार्जनसक्तः तावत्
- न पृच्छति
    - कः न पृच्छति ? कः अपि
    - कां न पृच्छति ? वार्ताम्
    - कुत्र न पृच्छति ? गेहे
    - कदा न पृच्छति ? जीवति (सति)
        - कदा जीवति (सति) ? पश्चात्
        - कस्मिन् जीवति ? जर्जरदेहे

# भज गोविन्दम् - मोहमुद्गरः - ६

## श्लोकः

**यावत्पवनो निवसति देहे तावत्पृच्छति कुशलं गेहे ।**

**गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ॥६॥**

## पदच्छेदः

यावत्, पवनः, निवसति, देहे, तावत्, पृच्छति, कुशलम्, गेहे,

गतवति, वायौ, देहापाये, भार्याः, बिभ्यति, तस्मिन्, काये

## अन्वयः

यावत् पवनः देहे निवसति तावत् गेहे कुशलं पृच्छति ।

वायौ गतवति (सति) देहापाये (सति) भार्याः तस्मिन् काये

बिभ्यति ।

## आकाङ्क्षा

- पृच्छति
  - कः पृच्छति ? (कोऽपि)
  - किं पृच्छति ? कुशलम्
  - कुत्र पृच्छति ? गेहे
  - कदा पृच्छति ? यावत् निवसति तावत्
    - कः निवसति ? पवनः
    - कुत्र निवसति ? देहे
- बिभ्यति
  - काः बिभ्यति ? भार्याः
  - कस्मिन् बिभ्यति ? काये
    - कस्मिन् काये ? तस्मिन्
  - कदा बिभ्यति ? देहापाये (सति)
    - कदा देहापाये (सति) ? गतवति (सति)
      - कस्मिन् गतवति (सति) ? वायौ

## श्लोकः

**बालस्तावत्क्रीडासक्तः तरुणस्तावत्तरुणीसक्तः ।**

**वृद्धस्तावच्चिन्तासक्तः परमे ब्रह्मणि कोऽपि न सक्तः ॥७॥**

## पदच्छेदः

बालः, तावत्, क्रीडासक्तः, तरुणः, तावत्, तरुणीसक्तः, वृद्धः, तावत्, चिन्तासक्तः, परमे, ब्रह्मणि, कः, अपि, न, सक्तः

## अन्वयः

(यावत्) (कश्चित्पुरुषः) बालः (अस्ति) तावत् क्रीडासक्तः (भवति) । (यावत्) तरुणः तावत् तरुणीसक्तः (भवति) । (यावत्) वृद्धः तावत् चिन्तासक्तः (भवति) । कः अपि परमे ब्रह्मणि सक्तः न (भवति) ।

## आकाङ्क्षा

- क्रीडासक्तः (भवति)
  - कः क्रीडासक्तः ? (कश्चित्पुरुषः)
  - (यावत्) क्रीडासक्तः (भवति) ? (यावत्) बालः (अस्ति) तावत्
- (कश्चित्पुरुषः) तरुणीसक्तः (भवति)
  - (यावत्) तरुणीसक्तः (भवति) ? (यावत्) तरुणः (अस्ति) तावत्
- (कश्चित्पुरुषः) चिन्तासक्तः (भवति)
  - (यावत्) चिन्तासक्तः (भवति) ? (यावत्) वृद्धः (अस्ति) तावत्
- सक्तः न (भवति)
  - कः सक्तः न (भवति) ? कः अपि
  - कस्मिन् सक्तः न (भवति) ? ब्रह्मणि
    - कीदृशे ब्रह्मणि ? परमे

## श्लोकः

**का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।**

**कस्य त्वं कः कुत आयातस्तत्त्वं चिन्तय तदिह भ्रातः ॥८॥**

## पदच्छेदः

का, ते, कान्ता, कः, ते, पुत्रः, संसारः, अयम्, अतीव, विचित्रः, कस्य, त्वम्, कः, कुतः, आयातः, तत्त्वम्, चिन्तय, तत्, इह, भ्रातः

## अन्वयः

(हे) भ्रातः । ते कान्ता का (अस्ति) ? ते पुत्रः कः (अस्ति) ? अयं संसारः अतीव विचित्रः (अस्ति) । त्वं कस्य (असि) ? (त्वं) कः (असि) ? (त्वं) कुतः आयातः (असि) ? इह (त्वं) तत् तत्त्वं चिन्तय ।

## आकाङ्क्षा

- (हे) भ्रातः ।
- का कान्ता (अस्ति) ?
  - कस्य कान्ता ? ते
- कः पुत्रः (अस्ति) ?
  - कस्य पुत्रः ? ते
- विचित्रः (अस्ति)
  - कियान् विचित्रः ? अतीव
  - कः विचित्रः (अस्ति) ? अयं संसारः
- त्वं कस्य (असि) ?
- (त्वं) कः (असि) ?
- (त्वं) कुतः आयातः (असि) ?
- (त्वं) चिन्तय
  - किं चिन्तय ? तत् तत्त्वम्
  - कदा / कुत्र चिन्तय ? इह

## श्लोकः

**सत्सङ्गत्वे निस्सङ्गत्वं निस्सङ्गत्वे निर्मोहत्वम् ।**

**निर्मोहत्वे निश्चलतत्त्वं निश्चलतत्त्वे जीवन्मुक्तिः ॥९॥**

## पदच्छेदः

सत्सङ्गत्वे, निस्सङ्गत्वम्, निस्सङ्गत्वे, निर्मोहत्वम्, निर्मोहत्वे, निश्चलतत्त्वम्, निश्चलतत्त्वे, जीवन्मुक्तिः

## अन्वयः

सत्सङ्गत्वे निस्सङ्गत्वम् । निस्सङ्गत्वे निर्मोहत्वम् । निर्मोहत्वे निश्चलतत्त्वम् । निश्चलतत्त्वे जीवन्मुक्तिः (भवति) ।

## आकाङ्क्षा

- निस्सङ्गत्वं (भवति)
  - कदा (भवति) ? सत्सङ्गत्वे (सति)
- निर्मोहत्वं (भवति)
  - कदा (भवति) ? निस्सङ्गत्वे (सति)
- निश्चलतत्त्वं (भवति)
  - कदा (भवति) ? निर्मोहत्वे (सति)
- जीवन्मुक्तिः (भवति)
  - कदा (भवति) ? निश्चलतत्त्वे (सति)

# भज गोविन्दम् - मोहमुद्गरः - 10

## श्लोकः

**वयसि गते कः कामविकारः शुष्के नीरे कः कासारः ।**

**क्षीणे वित्ते कः परिवारो ज्ञाते तत्त्वे कः संसारः ॥१०॥**

## पदच्छेदः

वयसि, गते, कः, कामविकारः, शुष्के, नीरे, कः, कासारः, क्षीणे, वित्ते, कः, परिवारः, ज्ञाते, तत्त्वे, कः, संसारः

## अन्वयः

वयसि गते (सति) कः कामविकारः ? नीरे शुष्के (सति) कः कासारः ? वित्ते क्षीणे (सति) कः परिवारः ? तत्त्वे ज्ञाते (सति) कः संसारः ?

## आकाङ्क्षा

- कः कामविकारः (भवति)
  - कदा (भवति) ? गते (सति)
    - कस्मिन् गते (सति) ? वयसि
- कः कासारः (भवति)
  - कदा (भवति) ? शुष्के (सति)
    - कस्मिन् शुष्के (सति) ? नीरे
- कः परिवारः (भवति)
  - कदा (भवति) ? क्षीणे (सति)
    - कस्मिन् क्षीणे (सति) ? वित्ते
- कः संसारः (भवति)
  - कदा (भवति) ? ज्ञाते (सति)
    - कस्मिन् ज्ञाते (सति) ? तत्त्वे

# भज गोविन्दम् - मोहमुद्गरः - 11

## श्लोकः

**मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालस्सर्वम् ।**

**मायामयमिदमखिलं बुद्ध्वा ब्रह्मपदं त्वं प्रविश विदित्वा ॥**

## पदच्छेदः

मा, कुरु, धनजनयौवनगर्वम्, हरति, निमेषात्, कालः, सर्वम्, मायामयम्, इदम्, अखिलम्, बुद्ध्वा, ब्रह्मपदम्, त्वम्, प्रविश, विदित्वा

## अन्वयः

(त्वं) धनजनयौवनगर्वं मा कुरु । निमेषात् कालः सर्वं हरति । इदम् अखिलं मायामयम् इति बुद्धवा त्वं ब्रह्मपदं विदित्वा (ब्रह्मपदं) प्रविश ।

## आकाङ्क्षा

- (त्वं) मा कुरु
  - कं मा कुरु ? धनजनयौवनगर्वम्
- हरति
  - कथं हरति ? निमेषात् (निमेषम् अतिक्रम्य वा निमेषम् अनतिक्रम्य वा)
  - कः हरति ? कालः
  - किं हरति ? सर्वम्
- त्वं प्रविश
  - कुत्र प्रविश ? (ब्रह्मपदम्)
  - किं कृत्वा प्रविश ? बुद्धवा
    - किमिति बुद्धवा ? मायामयम् इति
      - किं मायामयम् इति ? इदम् अखिलम्
  - पुनः किं कृत्वा प्रविश ? विदित्वा
    - किं विदित्वा ? ब्रह्मपदम्

## श्लोकः

**दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः ।**

**कालः क्रीडति गच्छत्यायुः तदपि न मुञ्चत्याशावायुः ॥१२॥**

## पदच्छेदः

दिनयामिन्यौ, सायम्, प्रातः, शिशिरवसन्तौ, पुनः, आयातः, कालः, क्रीडति, गच्छति, आयुः, तत्, अपि, न, मुञ्चति, आशावायुः

## अन्वयः

दिनयामिन्यौ (आयातः) । सायं प्रातः (च) (आयातः) ।
शिशिरवसन्तौ पुनः आयातः । कालः क्रीडति ।आयुः
गच्छति । तत् अपि आशावायुः न मुञ्चति ।

## आकाङ्क्षा

- (आयातः)
  - कौ (आयातः) ? दिनयामिन्यौ
- (आयातः)
  - कौ (आयातः) ? सायं प्रातः (च)
- आयातः
  - पुनः कौ आयातः ? पुनः शिशिरवसन्तौ
- क्रीडति
  - कः क्रीडति ? कालः
- गच्छति
  - कः गच्छति ? आयुः
- तत् अपि न मुञ्चति
  - कः न मुञ्चति ? आशावायुः

**श्लोकः**

**का ते कान्ताधनगतचिन्ता वातुल किं तव नास्ति नियन्ता**

**त्रिजगति सज्जनसंगतिरेका भवति भवार्णवतरणे नौका ॥१३**

**पदच्छेदः**

का, ते, कान्ता, धनगतचिन्ता, वातुल, किम्, तव, न, अस्ति, नियन्ता, त्रिजगति, सज्जनसङ्गतिः, एका, भवति, भवार्णवतरणे, नौका

**अन्वयः**

वातुल । का ते कान्ता ? (किमर्थं) धनगतचिन्ता ? तव नियन्ता न अस्ति किम् ? त्रिजगति भवार्णवतरणे सज्जनसंगतिः एका नौका भवति ।

**आकाङ्क्षा**

- (हे) वातुल ।
- का कान्ता ?
  - कस्य कान्ता ? ते
- (किमर्थं) धनगतचिन्ता ?
- न अस्ति किम् ?
  - कः न अस्ति ? नियन्ता
    - कस्य नियन्ता ? तव
- नौका भवति
  - कीदृशी नौका ? एका
  - कस्मिन् विषये नौका ? भवार्णवतरणे
  - का नौका भवति ? सज्जनसंगतिः
  - कुत्र नौका भवति ? त्रिजगति

## श्लोकः

**जटिलो मुण्डी लुञ्चितकेशः काषायाम्बरबहुकृतवेषः ।**

**पश्यन्नपि च न पश्यति मूढो ह्युदरनिमित्तं बहुकृतवेषः ॥**

## पदच्छेदः

जटिलः, मुण्डी, लुञ्चितकेशः, काषायाम्बरबहुकृतवेषः, पश्यन्, अपि, च, न, पश्यति, मूढः, हि, उदरनिमित्तम्, बहुकृतवेषः

## अन्वयः

जटिलः (वा) मुण्डी (वा) लुञ्चितकेशः (वा) काषायाम्बरबहुकृतवेषः (वा) मूढः, पश्यन् अपि च न पश्यति । उदरनिमित्तं हि (एषः) बहुकृतवेषः ।

## आकाङ्क्षा

- न पश्यति
  - कः न पश्यति ? मूढः
    - कीदृशः (सन्) मूढः ? जटिलः (वा)
    - पुनः कीदृशः (सन्) मूढः ? मुण्डी (वा)
    - पुनः कीदृशः (सन्) मूढः ? लुञ्चितकेशः (वा)
    - पुनः कीदृशः (सन्) मूढः ? काषायाम्बरबहुकृतवेषः (वा)
  - किं कुर्वन् अपि च न पश्यति ? पश्यन् अपि च
- बहुकृतवेषः (अस्ति)
  - कः बहुकृतवेषः ? (एषः)
  - किमर्थं बहुकृतवेषः ? उदरनिमित्तं हि

## श्लोकः

**अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ।**
**वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ॥**

## पदच्छेदः

अङ्गम्, गलितम्, पलितम्, मुण्डम्, दशनविहीनम्, जातम्, तुण्डम्, वृद्धः, याति, गृहीत्वा, दण्डम्, तत्, अपि, न, मुञ्चति, आशापिण्डम्

## अन्वयः

अङ्गं गलितम् । मुण्डं पलितम् । तुण्डं दशनविहीनं जातम् । (इत्यादिभिः विशिष्टः) वृद्धः दण्डं गृहीत्वा याति । तदपि (सः) आशापिण्डं न मुञ्चति ।

## आकाङ्क्षा

- गलितम् (अस्ति)
  - किं गलितम् ? अङ्गम्
- पलितम् (अस्ति)
  - किं पलितम् ? मुण्डम्
- जातम् (अस्ति)
  - कीदृशं जातम् ? दशनविहीनम्
  - किं जातम् ? तुण्डम्
- याति
  - कः याति ? (इत्यादिभिः विशिष्टः) वृद्धः
  - किं कृत्वा याति ? गृहीत्वा
    - किं गृहीत्वा ? दण्डम्
- तदपि न मुञ्चति
  - कः न मुञ्चति ? (सः)
  - किं न मुञ्चति ? आशापिण्डम्

## श्लोकः

**अग्रे वह्निः पृष्ठे भानुः रात्रौ चुबुकसमर्पितजानुः ।**
**करतलभिक्षस्तरुतलवासः तदपि न मुञ्चत्याशापाशः ॥१६॥**

## पदच्छेदः

अग्रे, वह्निः, पृष्ठे, भानुः, रात्रौ, चुबुकसमर्पितजानुः,
करतलभिक्षः, तरुतलवासः, तत्, अपि, न, मुञ्चति, आशापाशः

## अन्वयः

(कस्यचित्) अग्रे वह्निः (अस्ति) | (तस्य) पृष्ठे भानुः (अस्ति) | रात्रौ (सः) चुबुकसमर्पितजानुः (अस्ति) | (सः) करतलभिक्षः (अस्ति) | (सः) तरुतलवासः (अस्ति) | तत् अपि आशापाशः (तं) न मुञ्चति ।

## आकाङ्क्षा

- वह्निः (अस्ति)
  - कुत्र वह्निः ? अग्रे
    - कस्य अग्रे ? (कस्यचित्)
- भानुः (अस्ति)
  - कुत्र भानुः ? पृष्ठे
    - कस्य पृष्ठे ? (तस्य)
- चुबुकसमर्पितजानुः (अस्ति)
  - कः चुबुकसमर्पितजानुः ? (सः)
  - कदा चुबुकसमर्पितजानुः ? रात्रौ
- (सः) करतलभिक्षः (अस्ति)
- (सः) तरुतलवासः (अस्ति)
- तत् अपि न मुञ्चति
  - कः न मुञ्चति ? आशापाशः
- कं न मुञ्चति ? (तम्)

## श्लोकः

**कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम् ।**
**ज्ञानविहीनस्सर्वमतेन भजति न मुक्तिं जन्मशतेन ॥१७॥**

## पदच्छेदः

कुरुते, गङ्गासागरगमनम्, व्रतपरिपालनम्, अथवा, दानम्, ज्ञानविहीनः, सर्वमतेन, भजति, न, मुक्तिम्, जन्मशतेन

## अन्वयः

(कश्चित्) गङ्गासागरगमनं, व्रतपरिपालनम् अथवा दानं कुरुते । (सः) ज्ञानविहीनः (चेत्) सर्वमतेन, जन्मशतेन (अपि) मुक्तिं न भजति ।

## आकाङ्क्षा

- कुरुते
  - कः कुरुते ? (कश्चित्)
  - किं कुरुते ? गङ्गासागरगमनम्
  - अथवा किं कुरुते ? (अथवा) व्रतपरिपालनम्
  - अथवा किं कुरुते ? अथवा दानम्
- न भजति
  - कः न भजति ? (सः)
  - कीदृशः चित् न भजति ? ज्ञानविहीनः (चेत्)
  - कां न भजति ? मुक्तिम्
  - केन हेतुना (अपि) न भजति ? जन्मशतेन (अपि)
  - पुनः केन हेतुना (अपि) न भजति ? सर्वमतेन (अपि)

## श्लोकः

**सुरमन्दिरतरुमूलनिवासः शय्या भूतलमजिनं वासः**

**सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥१८॥**

## पदच्छेदः

सुरमन्दिरतरुमूलनिवासः, शय्या, भूतलम्, अजिनम्, वासः,

सर्वपरिग्रहभोगत्यागः, कस्य, सुखम्, न, करोति, विरागः

## अन्वयः

(कश्चित्) सुरमंदिरतरुमूलनिवासः (अस्ति) | (तस्य) शय्या भूतलं (भवति) | (तस्य) वासः अजिनं (भवति) | (सः) सर्वपरिग्रहभोगत्यागः (अस्ति) । (विरागः तस्य सुखं करोति एव) । विरागः कस्य सुखं न करोति ?

## आकाङ्क्षा

- सुरमंदिरतरुमूलनिवासः (अस्ति)
  - कः सुरमंदिरतरुमूलनिवासः ? (कश्चित्)
- (तस्य) शय्या (भवति)
  - किं (तस्य) शय्या ? भूतलम्
- (त्स्य) वासः (भवति)
  - किं (तस्य) वासः ? अजिनम्
- (सः) सर्वपरिग्रहभोगत्यागः (अस्ति)
- (विरागः तस्य सुखं करोति एव) ।
- न करोति
  - कः न करोति ? विरागः
  - किं न करोति ? सुखम्
    - कस्य सुखम् ? कस्य

Audio Courtesy: Smt. Harini Agaram; For updated info and elaborate grammatical details - https://nivedita2015.wordpress.com/bhaja-govindam-moha-mudgara/

## श्लोकः

**योगरतो वा भोगरतो वा सङ्गरतो वा सङ्गवीहीनः।**

**यस्य ब्रह्मणि रमते चित्तं नन्दति नन्दति नन्दत्येव॥१९॥**

## पदच्छेदः

योगरतः वा भोगरतः वा सङ्गरतः वा सङ्गवीहीनः यस्य ब्रह्मणि रमते चित्तम् नन्दति नन्दति नन्दति एव

## अन्वयः

योगरतः वा भोगरतः वा सङ्गरतः वा सङ्गवीहीनः वा (भवतु) । यस्य चित्तं ब्रह्मणि रमते, (सः) नन्दति । (सः) (एव) नन्दति । (सः) नन्दति एव ।

## आकाङ्क्षा

- (भवतु)
  - कीदृशः वा (भवतु) ? योगरतः वा
  - पुनः कीदृशः वा (भवतु) ? भोगरतः वा
  - पुनः कीदृशः वा (भवतु) ? सङ्गरतः वा
  - पुनः कीदृशः वा (भवतु) ? सङ्गवीहीनः वा
- (सः) नन्दति
  - कः नन्दति ? यस्य चित्तं रमते
    - कस्मिन् विषये रमते ? ब्रह्मणि
- (सः) (एव) नन्दति ।
- (सः) नन्दति एव ।

## श्लोकः

**भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता ।**

**सकृदपि येन मुरारिसमर्चाक्रियते तस्य यमेन न चर्चा ॥**

## पदच्छेदः

भगवद्गीता, किञ्चित्, अधीता, गङ्गाजललवकणिका, पीता,

सकृत्, अपि, येन, मुरारिसमर्चा, क्रियते, तस्य, यमेन, न, चर्चा

## अन्वयः

(येन) भगवद्गीता किञ्चित् अधीता, (येन)

गङ्गाजललवकणिका पीता, येन सकृत् अपि मुरारिसमर्चा

(क्रियते), तस्य चर्चा यमेन न क्रियते ।

## आकाङ्क्षा

- न क्रियते
  - केन न क्रियते ? यमेन
  - का न क्रियते ? चर्चा
    - कस्य चर्चा ? तस्य
    - कीदृशस्य तस्य ? (येन) अधीता
      - का अधीता ? भगवद्गीता
      - कियती अधीता ? किञ्चित् (अपि)
    - पुनः कीदृशस्य तस्य ? (येन) पीता
      - का पीता ? गङ्गाजललवकणिका
    - पुनः कीदृशस्य तस्य ? (येन क्रियते)
      - का क्रियते ? मुरारिसमर्चा
      - कतिवारं क्रियते ? सकृत् अपि

**श्लोकः**

**पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।**
**इह संसारे बहु दुस्तारे कृपयाऽपारे पाहि मुरारे ॥२१॥**

**पदच्छेदः**

पुनः, अपि, जननम्, पुनः, अपि, मरणम्, पुनः, अपि, जननीजठरे, शयनम्, इह, संसारे, बहु, दुस्तारे, कृपया, अपारे, पाहि, मुरारे

**अन्वयः**

(हे) मुरारे ! पुनः अपि जननम् । पुनः अपि मरणम् । पुनः अपि जननीजठरे शयनम् । बहु दुस्तारे, अपारे, इह संसारे (त्वं) कृपया (मां) पाहि ।

**आकाङ्क्षा**

- (हे) मुरारे !
- पुनः अपि जननम् ।
- पुनः अपि मरणम् ।
- पुनः अपि शयनम्
  - कुत्र शयनम् ? जननीजठरे
- (त्वं मां) पाहि
  - कथं पाहि ? कृपया
  - कुत्र पाहि ? इह संसारे
    - कीदृशे संसारे ? दुस्तारे
      - कियति दुस्तारे ? बहु
    - पुनः कीदृशे संसारे ? अपारे

## श्लोकः

**रथ्याचर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः ।**

**योगी योगनियोजितचित्तो रमते बालोन्मत्तवदेव ॥२२॥**

## पदच्छेदः

रथ्याचर्पटविरचितकन्थः, पुण्यापुण्यविवर्जितपन्थः, योगी, योगनियोजितचित्तः, रमते, बालोन्मत्तवत्, एव

## अन्वयः

रथ्याचर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः

योगनियोजितचित्तः योगी एव बालोन्मत्तवत् रमते ।

## आकाङ्क्षा

- रमते
  - कथं रमते ? बालोन्मत्तवत्
  - कः रमते ? योगी एव
    - कीदृशः योगी ? रथ्याचर्पटविरचितकन्थः
    - पुनः कीदृशः योगी ? पुण्यापुण्यविवर्जितपन्थः
    - पुनः कीदृशः योगी ? योगनियोजितचित्तः

# भज गोविन्दम् - मोहमुद्गरः - 23

## श्लोकः

**कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ।**

**इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम् ॥**

## पदच्छेदः

कः, त्वम्, कः, अहम्, कुतः, आयातः, का, मे, जननी, कः, मे, तातः,

इति, परिभावय, सर्वम्, असारम्, विश्वम्, त्यक्त्वा, स्वप्नविचारम्

## अन्वयः

विश्वं त्यक्त्वा, "त्वं कः ? अहं कः ? कुतः आयातः ? का मे जननी ? कः मे तातः ? सर्वं विश्वम् असारं, स्वप्नविचारम्" इति परिभावय ।

## आकाङ्क्षा

- (त्वं) परिभावय
  - किं इति परिभावय ? ... (इति)
    - कः त्वम् (असि) ?
    - कः अहम् (अस्मि) ?
    - कुतः आयातः (अस्मि) ?
    - का जननी (अस्ति) ?
      - कस्य जननी ? मे
    - कः तातः (अस्ति) ?
      - कस्य तातः ? मे
  - पुनः किं इति परिभावय ? असारम् अस्ति इति
    - किम् असारम् अस्ति इति ? सर्वं (विश्वम्)
  - किं कृत्वा परिभावय ? त्यक्त्वा
    - किं त्यक्त्वा ? विश्वम्
      - कीदृशं विश्वम् ? स्वप्नविचारम्

## श्लोकः

**त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि मय्यसहिष्णुः ।**
**भव समचित्तस्सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम् ॥**

## पदच्छेदः

त्वयि, मयि, च, अन्यत्र, एकः, विष्णुः, व्यर्थम्, कुप्यसि, मयि, असहिष्णुः, भव, समचित्तः, सर्वत्र, त्वम्, वाञ्छसि, अचिरात्, यदि, विष्णुत्वम्

## अन्वयः

त्वयि मयि अन्यत्र च विष्णुः एकः । मयि असहिष्णुः (सन्) त्वं व्यर्थं कुप्यसि । यदि त्वं विष्णुत्वम् अचिरात् वाञ्छसि (तर्हि) सर्वत्र समचित्तः भव ।

## आकाङ्क्षा

- एकः (अस्ति)
  - कः एकः अस्ति ? विष्णुः
  - कस्मिन् एकः (अस्ति) ? त्वयि
  - पुनः कस्मिन् एकः (अस्ति) ? मयि च
  - पुनः कस्मिन् एकः (अस्ति) ? अन्यत्र च
- (त्वं) कुप्यसि
  - किमर्थं कुप्यसि ? व्यर्थम्
  - कथंभूतः सन् कुप्यसि ? असहिष्णुः (सन्)
  - कस्मिन् विषये कुप्यसि ? मयि
- त्वं भव
  - कीदृशः भव ? समचित्तः
    - कुत्र समचित्तः ? सर्वत्र
  - किं चेत् भव ? यदि त्वं वाञ्छसि (तर्हि)
    - कथं वाञ्छसि चेत् ? अचिरात्
    - किं वाञ्छसि चेत् ? विष्णुत्वम्

Audio Courtesy: Smt. Harini Agaram; For updated info and elaborate grammatical details - https://nivedita2015.wordpress.com/bhaja-govindam-moha-mudgara/

## श्लोकः

**शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ ।**

**सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् ॥२५॥**

## पदच्छेदः

शत्रौ, मित्रे, पुत्रे, बन्धौ, मा, कुरु, यत्नम्, विग्रहसन्धौ, सर्वस्मिन्, अपि, पश्य, आत्मानम्, सर्वत्र, उत्सृज, भेदाज्ञानम्

## अन्वयः

शत्रौ मित्रे पुत्रे बन्धौ विग्रहसन्धौ यत्नं मा कुरु । सर्वस्मिन् अपि आत्मानं पश्य । सर्वत्र भेदाज्ञानम् उत्सृज ।

## आकाङ्क्षा

- (त्वं) मा कुरु
  - किं मा कुरु ? यत्नम्
    - कस्मिन् विषये यत्नम् ? विग्रहसन्धौ
      - कस्मिन् विषये विग्रहसन्धौ ? शत्रौ मित्रे पुत्रे बन्धौ (वा)
- (त्वं) पश्य
  - कं पश्य ? आत्मानम्
  - कुत्र पश्य ? सर्वस्मिन् अपि
- (त्वम्) उत्सृज
  - किम् उत्सृज ? भेदाज्ञानम्
  - कुत्र / कस्मिन् विषये उत्सृज ? सर्वत्र

## श्लोकः

**कामं क्रोधं लोभं मोहं त्यक्त्वाऽत्मानं पश्यति सोऽहम् ।**

**आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥२६॥**

## पदच्छेदः

कामम्, क्रोधम्, लोभम्, मोहम्, त्यक्त्वा, आत्मानम्, पश्यति, सः, अहम्, आत्मज्ञानविहीनाः, मूढाः, ते, पच्यन्ते, नरकनिगूढाः

## अन्वयः

(आत्मज्ञः) कामं क्रोधं लोभं मोहं त्यक्त्वा, "सः अहम्" (इति) आत्मानं पश्यति । आत्मज्ञानविहीनाः मूढाः । ते नरकनिगूढाः (यमादिभिः) पच्यन्ते ।

## आकाङ्क्षा

- पश्यति
  - कः पश्यति ? (आत्मज्ञः)
  - कं पश्यति ? आत्मानम्
  - किमिति पश्यति ? अहम् (इति)
    - कः अहम् ? सः
  - किं कृत्वा पश्यति ? त्यक्त्वा
    - कानि त्यक्त्वा ? कामं क्रोधं लोभं मोहं च
- मूढाः (भवन्ति)
  - के मूढाः ? आत्मज्ञानविहीनाः
- पच्यन्ते
  - कैः पच्यन्ते ? (यमादिभिः)
  - के पच्यन्ते ? ते नरकनिगूढाः



## श्लोकः

**गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ।**

**नेयं सज्जनसङ्गे चित्तं देयं दीनजनाय च वित्तम् ॥२७॥**

## पदच्छेदः

गेयम्, गीतानामसहस्रम्, ध्येयम्, श्रीपतिरूपम्, अजस्रम्, नेयम्, सज्जनसङ्गे, चित्तम्, देयम्, दीनजनाय, च, वित्तम्

## अन्वयः

(त्वया) गीतानामसहस्रं गेयं, श्रीपतिरूपम् अजस्रं ध्येयं, सज्जनसङ्गे चित्तं नेयं, दीनजनाय वित्तं देयं च (अस्ति)।

## आकाङ्क्षा

- (त्वया) गेयम् (अस्ति)
  - किं गेयम् (अस्ति) ? गीतानामसहस्रम्
- (त्वया) ध्येयम् (अस्ति)
  - किं ध्येयम् (अस्ति) ? श्रीपतिरूपम्
    - कियत् कालं ध्येयम् ? अजस्रम्
- (त्वया) नेयम् (अस्ति)
  - किं नेयम् (अस्ति) ? चित्तम्
  - कस्मिन् विषये नेयम् ? सज्जनसङ्गे
- (त्वया) देयम् (अस्ति)
  - किं देयम् (अस्ति) ? वित्तम्
  - कस्मै देयम् (अस्ति) ? दीनजनाय

# भज गोविन्दम् - मोहमुद्गरः - 28

## श्लोकः

**सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः ।**

**यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् ॥**

## पदच्छेदः

सुखतः, क्रियते, रामाभोगः, पश्चात्, हन्त, शरीरे, रोगः, यद्यपि, लोके, मरणम्, शरणम्, तत्, अपि, न, मुञ्चति, पापाचरणम्

## अन्वयः

हन्त ! सुखतः रामाभोगः क्रियते । पश्चात् शरीरे रोगः (भवति) । यद्यपि लोके मरणं शरणं, तत् अपि (मूढः) पापाचरणं न मुञ्चति ।

## आकाङ्क्षा

- हन्त !
- क्रियते
    - केन क्रियते ? (केनचित्)
    - कथं क्रियते ? सुखतः
    - कः क्रियते ? रामाभोगः
- रोगः (भवति)
    - कदा रोगः (भवति) ? पश्चात्
    - कुत्र रोगः (भवति) ? शरीरे
        - कस्य शरीरे ? (तस्य)
- न मुञ्चति
    - कः न मुञ्चति ? (सः)
    - किं न मुञ्चति ? पापाचरणम्
    - कस्मिन् स्तिथौ अपि न मुञ्चति ? यद्यपि शरणम् (अस्ति) तत् अपि
        - किं शरणम् अस्ति ? मरणम्
        - कुत्र शरणम् अस्ति ? लोके

Audio Courtesy: Smt. Harini Agaram; For updated info and elaborate grammatical details - https://nivedita2015.wordpress.com/bhaja-govindam-moha-mudgara/

## श्लोकः

**अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।**

**पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ॥२९॥**

## पदच्छेदः

अर्थम्, अनर्थम्, भावय, नित्यम्, न, अस्ति, ततः, सुखलेशः, सत्यम्, पुत्रात्, अपि, धनभाजाम्, भीतिः, सर्वत्र, एषा, विहिता, रीतिः

## अन्वयः

अर्थम् अनर्थं नित्यं भावय । ततः सुखलेशः (अपि) सत्यं न अस्ति । पुत्रात् अपि धनभाजां भीतिः (भवति) । सर्वत्र एषा विहिता रीतिः (भवति) ।

## आकाङ्क्षा

- भावय
  - कदा भावय ? नित्यम्
  - किमिति भावय ? अनर्थम् (इति)
    - किम् अनर्थम् ? अर्थम्
- न अस्ति
  - कथं न अस्ति ? सत्यम्
  - कः न अस्ति ? सुखलेशः (अपि)
  - कस्मात् कारणात् सुखलेशः ? ततः
- भीतिः (भवति)
  - केषां भीतिः भवति ? धनभाजाम्
  - कस्मात् अपि भीतिः भवति ? पुत्रात् अपि
- (भवति)
  - का भवति ? एषा रीतिः
    - कीदृशी रीतिः ? विहिता
  - कुत्र भवति ? सर्वत्र

# भज गोविन्दम् - मोहमुद्गरः - 30

## श्लोकः

**प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम् ।**

**जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम् ॥३०॥**

## पदच्छेदः

प्राणायामम्, प्रत्याहारम्, नित्यानित्यविवेकविचारम्, जाप्यसमेतसमाधिविधानम्, कुरु, अवधानम्, महत्, अवधानम्

## अन्वयः

प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारं जाप्यसमेतसमाधिविधानम् अवधानं कुरु । महत् अवधानं कुरु ।

## आकाङ्क्षा

- (त्वं) कुरु
  - कथं कुरु ? अवधानम्
  - किं कुरु ? प्राणायामम्
  - पुनः किं कुरु ? प्रत्याहारम्
  - पुनः किं कुरु ? नित्यानित्यविवेकविचारम्
  - पुनः किं कुरु ? जाप्यसमेतसमाधिविधानं च
- (त्वं कुरु)
  - कथं कुरु ? अवधानम्
    - कीदृशम् अवधानम् ? महत्

**श्लोकः**

**गुरुचरणाम्बुजनिर्भरभक्तः सम्सारादचिराद्भव मुक्तः ।**

**सेन्द्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम् ॥३१॥**

**पदच्छेदः**

गुरुचरणाम्बुजनिर्भरभक्तः, संसारात्, अचिरात्, भव, मुक्तः,

सेन्द्रियमानसनियमात्, एवम्, द्रक्ष्यसि, निजहृदयस्थम्, देवम्

**अन्वयः**

गुरुचरणाम्बुजनिर्भरभक्तः (त्वं) अचिरात्

सेन्द्रियमानसनियमात् संसारात् मुक्तः भव । एवं (त्वं)

निजहृदयस्थं देवं द्रक्ष्यसि ।

**आकाङ्क्षा**

- (त्वं) भव
  - कीदृशः त्वम् ? गुरुचरणाम्बुजनिर्भरभक्तः
  - कीदृशः भव ? मुक्तः
    - कस्मात् मुक्तः ? संसारात्
    - कस्मात् कारणात् मुक्तः ? सेन्द्रियमानसनियमात्
  - कदा भव ? अचिरात्
- (त्वं) द्रक्ष्यसि
  - कथं द्रक्ष्यसि ? एवम्
  - कं द्रक्ष्यसि ? देवम्
    - कीदृशं देवम् ? निजहृदयस्थम्

# भज गोविन्दम् - मोहमुद्गरः

# Bhaja Govindam – Mohamudgara



You can access and download the detailed notes available at **https://nivedita2015.wordpress.com/bhaja-govindam-moha-mudgara/**

It includes the shloka, anvaya, meaning in Sanskrit and English, grammatical characteristics of the individual words, Kaaraka and non-kaaraka relationships, Sandhi, Samaasa, Chandas, etc. which will be useful for Sanskrit students. The study material compiled and posted by me (**Nivedita**) in the year 2015 at (**Vidyaadaanam**) nivedita2015.wordpress.com is now being revised.

Thanks to my friend, **Smt. Harini Agaram** for the rendition.
Watch out for the online classes in Sanskrit to be conducted by **Smt. Vidhya Ramesh** on Bhaja Govindam.